भागव

भागव

भागधेयः, पुं, (भागेन धीयते इति । धा + कर्म्मणि यत् ।) राजकरः । इत्यमरः । २ । ८ । २७ ॥ दायादः । इति जटाधरः ॥

भागवतं, क्ली, (भगवतो भगवत्या वेदम् । भगवत् + तस्येदमित्यण् ।) अष्टादशपुराणान्तर्गतमहापुराणविशेषः । स च वेदव्यासकृतद्वादशस्कन्धद्वात्रिंशत्त्रिशताध्यायसमन्विताष्टादशसहस्रश्लोकसंख्याक-भगवन्माहात्म्यवर्णन-प्रधानको ग्रन्थः । यथोक्तं मत्स्यपुराणे पुराणदानप्रस्तावे ।

"यत्राधिकृत्य गायत्त्रीं वर्ण्यते धर्म्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥
लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम् ।
प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदम् ॥
अष्टादशसहस्राणि पुराणं तत् प्रकीर्त्तितम् ॥"

पुराणान्तरे च ।

"ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः ।
हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥
गायत्त्र्या च समारम्भस्तद्वै भागवतं विदुरिति ॥"

पद्मपुराणे च अम्बरीषं प्रति गौतमवचनम् ॥

"अम्बरीष ! शुकप्रोक्तं नित्यं भागवतं शृणु ।
पठस्व स्वमुखेनापि यदीच्छसि भवक्षयमिति ॥"

इति श्रीभागवतटीकायां श्रीधरस्वामी ॥

(तत्र तावत् पुराणेषु भागवतद्वयं प्रसिद्धम् । एकं महापुराणान्तर्गतमपरमुपपुराणान्तर्गतम् । लोकेऽप्युपलभ्यते द्वयोर्द्देवीभागवतनाम्ना विष्णुभागवतनाम्ना चाख्यैव । तत्रैकं महापुराणान्तर्गतमन्यदुपपुराणान्तर्गतमित्यपि निर्व्विवादमेव । तथापि किं देवीभागवतं महापुराणमन्यदुपपुराणमथवा विष्णुभागवतं महापुराणमन्यदुपपुराणमिति संशये केचित् विष्णुभागवतमेव महापुराणमिति वदन्ति । केचित् देवीभागवतमेव महापुराणमिति वदन्ति । तत्र प्रथमपक्षैकदेशिनः केचिदुपपुराणेषु द्वितीयं भागवतं नास्त्येव महापुराणेष्वेवैकं भागवतं प्रसिद्धम् । तच्च विष्णुभागवतमेव न देवीभागवतम् । देवीभागवतन्तु निर्मूलमेवेति वदन्ति । द्वितीयपक्षैकदेशिनोऽपि विष्णुभागवतं बोपदेवकृतमिति वदन्ति । वस्तुतस्तूभयोरपि पुराणयोः पुराणमतभेदेन महापुराणत्वमुपपुराणत्वञ्च । ननु महापुराणेष्वेवैकं भागवतं प्रसिद्धम् । नतूपपुराणेषु द्वितीयमस्तीति चेन्न । कूर्म्मगरुड़पाद्मादिषूपपुराणेषु द्वितीयस्य तद्परिगणनात् । तथाहि हेमाद्रौ दानप्रस्तावे कूर्म्मपुराणेऽष्टादशपुराणान्युक्त्वा,—

"अन्यान्युपपुराणानि मुनिभिः कथितानि तु ।
आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् ॥"

इत्यादि ॥

"पराशरोक्तं प्रवरं तथा भागवताह्वयम् ॥" इति ।

तथा गारुड़े तत्त्वरहस्ये द्वितीयांशे धर्म्मकाण्डे प्रथमाध्याये प्रथमतो महापुराणानां सात्त्विकादिभेदेन विभागमुक्त्वा लघुपुराणानां सात्त्विकादिभेदेन विभागप्रदर्शनपरे ग्रन्थेऽप्युक्तम् ।

"पुराणं भागवतं शैवं नन्दिप्रोक्तं तथैव च ।
पाशुपत्यं रैणुकञ्च भैरवञ्च तथैव च ॥"

इति ॥

तथा तत्पूर्व्वमपि ।

"विष्णुधर्म्मोत्तरे चैव तत्र भागवतं तथेति ॥"

तत्र भागवतं तथेति पाठे तत्रं शाक्तमित्यर्थः । तद्विशेषणेन चोत्तमत्वं ध्वनितम् । तथा पाद्मे शकुनपरीक्षायाम् ।

"ब्राह्मं पाद्मं वैष्णवञ्च मार्कण्डं नारदेरितम् ॥"

इत्यादि ॥

"तथैव गदितं राम ! पुराणं कापिलं तथा ।
वाराहं ब्रह्मवैवर्त्तं शकुनेषु प्रशस्यते ।
शैवं भागवतं शैवं भविष्योत्तरमेव च ॥" इति ॥

तथा पाद्मे भागवतमाहात्म्ये एकोनविंशेऽध्याये उपपुराणेषु ।

"शैवमादिपुराणञ्च देवीभागवतं तथा ॥" इति ॥

तथा मधुसूदनसरस्वतीकृतसर्व्वशास्त्रार्थसंग्रहेऽप्युपपुराणमध्ये भागवतं परिगणितम् । नागोजीभट्टादिभिश्च धर्म्मशास्त्रग्रन्थेष्वेवमन्यैरपि निबन्धकारैरिति । ननु देवीभागवतस्य ।

"तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम् ॥"

इति प्रथमाध्यायस्थस्ववचनेनाष्टादशमहापुराणेषु पञ्चममिदं पुराणमिति स्वस्य महापुराणत्वं बोधयतः कथमन्यपुराणमुपपुराणत्वं बोधयेन्नह्येवं क्वचिद्दृष्टचरमिति चेन्न । नारदीयशिववायव्यादित्यपुराणानां स्वमुखेनान्यमुखेन वा महापुराणत्वेन ज्ञायमानानामन्यपुराणैरुपपुराणत्वस्य व्यवस्थापनात् । पुराणमतभेदेनैकस्यापि पुराणस्य महापुराणत्वोपपुराणत्वसिद्ध्या तद्विरोधाभावात् पुराणभेदेन मतभेदस्तु बहुशः प्रसिद्धः । वैष्णवपुराणेषु सात्त्विकत्वं शैवपुराणेषु तामसत्वं वैष्णवपुराणमतेन । शैवपुराणेषु सात्त्विकत्वं वैष्णवपुराणेषु तामसत्वम् ।

"दश शैवपुराणानि सात्त्विकानि विदुर्बुधाः ।
तामसानि च चत्वारि वैष्णवानि प्रचक्षते ॥"

इति स्कान्दे ॥

शैवपुराणमतेनैवं प्रकारेणेति । तथाहि नारदीयस्य पुराणस्य स्वान्तर्गतमहापुराणगणनया स्वमुखेनैव स्वात्मनो महापुराणत्वं बोधयतः ।

"मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
आलिंपाग्निपुराणानि कूस्कंगारुड़मेव च ॥"

इति वचनेन वक्ष्यमाणमुद्गलपुराणवचनेन च महापुराणबहिर्भूतत्वं बोध्यते । आलिंपाग्नीत्यत्राऽऽग्नेयशब्देनादित्यपुराणं तथा शैवपुराणस्य स्वमुखेन स्वस्य महापुराणत्वं बोधयतो मद्वयं भद्वयमित्येव वचनं तद्बहिर्भूतत्वं बोधयति । ननु वायव्यं पुराणमेव शैवं शिवप्रतिपादकत्वात्तस्य च वचतुष्टयपदेन संग्रहात्तदुदाहरणं न सम्भवतीति चेन्न । मुद्गलपुराणे ।

"ब्राह्मञ्च वैष्णवं पाद्मं शैवं भागवतं तथा ।
भविष्यं ब्रह्मवैवर्त्तं मार्कण्डेयञ्च वामनम् ॥
आग्नेयं वायवं मात्स्यम् ।" इति वचनेन शैववायव्यपुराणयोः परस्परं पृथक्त्वेन परिगणनात् ।

तथा वायव्यपुराणस्य स्ववचनेन स्वस्य महापुराणत्वं बोधयतो वक्ष्यमाणशैवपुराणवचनं महापुराणबहिर्भूतत्वं बोधयति । तथादित्यपुराणस्यापि आलिंपाग्निपुराणानीति क्वचित् पुराणसम्मतपाठेन महापुराणत्वम् । अनापलिङ्गकूस्काख्यमिति क्वचित् पुराणसम्मतपाठेन महापुराणबहिर्भूतत्वं यथा चैतेषां चतुर्णां क्वचित् पुराणेषु महापुराणत्वेन क्वचिच्चोपपुराणत्वेन ग्रहणम् । तथा देवीभागवतस्यापि भविष्यतीति को विरोधः । मतभेदेनोभयोरपि वचनयोः प्रमाणत्वात् । ननु अन्यान्युपपुराणानि मुनिभिः कथितानि त्वित्यादिवचनैरुपपुराणानि व्यासान्यमुनिकृतान्येव सन्ति । देवीभागवतं तु व्यासकृतमेवेति । तस्य कथमुपपुराणेष्वन्तर्भाव इति चेन्न । नारदशैववायव्यादित्यपुराणेषु व्यासकृतत्वेऽपि कस्यचित् पुराणमते उपपुराणत्वदर्शनात्ताद्दशनियमस्यास्वीकारात् प्रायशस्तथा सत्त्वाभिप्रायेण तु तद्वचनम् । इत्थं भागवतद्वयस्य महापुराणमध्ये उपपुराणमध्ये च सत्त्वसिद्धौ कस्य पुराणस्य मते किं भागवतं महापुराणान्तर्गतमिति चेदुच्यते । शैवपुराणमते मात्स्यपुराणमते च देवीभागवतमेव महापुराणमिति । तथाहि शैवपुराणे उत्तरखण्डे मध्यमेश्वरमाहात्म्ये शिवाख्यवरेण व्यासेन महापुराणानि प्रणीतानीत्युक्त्वानन्तरं तेषां नामान्यष्टादशोक्त्वा तेषां योगरूढ़ानां नाम्नां निर्व्वचनं तत्रैव कृतम् । तद्यथा,—

"यत्र वक्ता स्वयं तक्ष्ण ! ब्रह्मा साक्षाच्चतुर्म्मुखः ।
तस्माद्ब्राह्मं समाख्यातं पुराणं प्रथमं मुने ! ॥"

तक्ष्ण इति मुनिसम्बोधनम् ।

"पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम् ।
तस्मात् पाद्मं समाख्यातं पुराणञ्च द्वितीयकम् ॥
पराशरकृतं यत्तु पुराणं विष्णुबोधकम् ।
तदेव व्यासकथितं पुत्रपित्रोरभेदतः ॥
यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु ।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥
भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते ।
तत्तु भागवतं प्रोक्तं ननु देवीपुराणकम् ॥
नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते ॥
यत्र वक्ताभवत्तक्ष्ण ! मार्कण्डेयो महामुनिः ।
मार्कण्डेयपुराणं हि तदाख्यातञ्च सप्तमम् ॥
अग्नियोगात्तदाग्नेयं भविष्योक्तेर्भविष्यकम् ।
विवर्त्तनाद्ब्रह्मणस्तु ब्रह्मवैवर्त्तमुच्यते ॥
लिङ्गस्य चरितोक्तत्वात् पुराणं लिङ्गमुच्यते ।
वराहस्य च वाराहं पुराणं द्वादशं मुने ! ॥
यत्र स्कन्दः स्वयं वक्ता श्रोता साक्षात् महेश्वरः ।
तत्तु स्कान्दं समाख्यातं वामनस्य तु वामनम् ॥
कौर्म्मं कूर्म्मस्य चरितं मात्स्यं मत्स्यस्य कीर्त्तितम् ।